# Nageshvara Mahima Varnanam

# नागेश्वरमहिमवर्णनम्

## Document Information

Text title : Nageshvara Mahima Varnanam

File name : nAgeshvaramahimavarNanam.itx

Category : shiva, shivarahasya

Location : doc_shiva

Proofread by : Ruma Dewan

Description/comments : shrIshivarahasyam | bhargAkhyaH panchamAMshaH | adhyAyaH 17| 1-39||

Latest update : June 18, 2023

Send corrections to : sanskrit at cheerful dot c om

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanskript**.

February 1, 2024

*sanskritdocuments.org*

# नागेश्वरमहिमवर्णनम्

ईश्वरः -
आवण्ढ(वट्ट)कं महापुण्यं क्षेत्रमस्त्येकमम्बिके ।
नागनाथाह्वयं लिङ्गं ममास्ति भुवनेश्वरि ॥ १॥

तत्रत्यसिकताः सर्वा लिङ्गरूपाश्च केवलम् ।
तत्र सन्ति महाशैवा नागनाथार्चने रताः ॥ २॥

भस्मरुद्राक्षसम्पन्नाः शिवध्यानपरायणाः ।
रुद्रावर्तनशीलाश्च रुद्रलिङ्गैकपूजकाः ॥ ३॥

मन्नाममनिरता नित्यमन्यनामपराङ्मुखाः ।
मल्लिङ्गालोचनेनैव तेषां प्रीतिरहर्निशम् ॥ ४॥

कामुकः कामिनीं दृष्ट्वा यथा प्रीतो भवेच्छिवे ।
मम लिङ्गं तथा शैवा बिल्वसम्पूजितं मुदा ॥ ५॥

नागनाथं स्तुवन्त्येव वीक्षन्ति प्रणमन्ति च ।
वसन्ति तत्र मुनयो विनयोज्ज्वलविग्रहाः ॥ ६॥

नागनाथं महादेवं पूजयन्ति गणेश्वरः ।
नागकुण्डमिति ख्यातं पातालविवरं महत् ॥ ७॥

तन्मार्गेण समागत्य शेषोऽनन्तफणामुखः ।
स्वमौलिरत्नजालैर्मां पूजयत्येव शङ्करि ॥ ८॥

सहस्रवदनेनापि रुद्रसूक्तैर्महेश्वरम् ।
मां स्तौति भक्त्या नियतं स मे गणवरोत्तमः ॥ ९॥

तस्मिन्प्रीतिर्ममात्यन्तं कुमारे गणपे यथा ।
त्वयि सर्वामरेशानि तथा शैवोऽयमम्बिके ॥ १०॥

शैव शरीरं देवेशि मदालयमनुत्तमम् ।

तस्यैव हृदयाम्भोजगर्भागारे मनोरमे ॥ ११॥

नीवारशूकसदृशलिङ्गाकारोऽस्मि शङ्करि ।
त्वद्देहं येन सम्पूज्य स्थितं सोऽपि मदर्चकः ॥ १२॥

शैवसम्पूजनादेव मम प्रीतिर्महेश्वरि ।
स्वतन्त्रस्य महेशस्य सर्वम्भाग्ययुतस्य मे ॥ १३॥

किं नाम क्रियते देवि पूजया वा सुमैः शिवे ।
लोकसंरक्षणार्थाय लिङ्गे गृह्णामि पूजनम् ॥ १४॥

भक्तैर्मम कृता पूजा तुष्ट्यै भवति शोभने ।
सूक्ष्मं मदीयं लिङ्गं तत्पश्यन्ति शिवयोगिनः ॥ १५॥

लिङ्गमेतन्महादेवि ज्ञानहीनो न पश्यति ।
नत्वा तं वेदवाक्यैश्च जायते मत्कृपाबलात् ॥ १६॥

कथमन्येऽपि पश्यन्ति नानाकामैकगामिनः ।
सखण्डान्यन्यलिङ्गानि चाखण्डं व्यापकं मम ॥ १७॥

कस्यचिद्भूरिभाग्येन सभाग्यस्येव शङ्करि ।
निर्भाग्यानां महादेवि तज्ज्ञानं नैव जायते ॥ १८॥

मत्कृपामात्रमेकं हि शैवगात्रं गिरीन्द्रजे ।
शैवः शिवैकशरणः शिवलिङ्गार्चनप्रियः ॥ १९॥

शिवक्षेत्ररतो नित्यं श्रीरुद्रजपतत्परः ।
भस्मरुद्राक्षसम्पन्नः षडक्षरजपादरः ॥ २०॥

शैवसम्पूजको नित्यं शिवनैवेद्यभोजनः ।
मन्नामपरमो नित्यं त्यक्त्वाऽन्यसुरकीर्तनम् ॥ २१॥

शिव शम्भो महादेव प्रसीदेति वदन मुदा ।
आपादमस्तकं भस्म समुद्धूल्य यथाविधि ॥ २२॥

रुद्रावर्तनशीलो यः स मे भक्तः सदाम्बिके ।
वेदवेदान्तवाक्यैश्च बोधज्ञानपरः सदा ॥ २३॥

तस्यैव जायते ज्ञानं नान्यथा कर्मकोटिभिः ।
असत्यमिति तत्सर्वं त्रैगुण्यं परमेश्वरि ॥ २४॥

आविद्यकानि शास्त्राणि मिथ्याज्ञानप्रदानि हि ।
मच्छास्त्रं सत्यमेवेदं ब्रह्मैवेदमिति श्रुतिः ॥ २५॥

आत्मैवेदमिदं दृश्यं तस्मिन् जगदिदं मृषा ।
जगत्प्ररोचनाशास्त्रं सत्यत्वे कल्पयिष्यते ॥ २६॥

मूढानां स्वर्गनरकपुण्यपापादिवासनाः ।
त्रैगुण्यविषयो वेदः स्वाधिकारानुरूपतः ॥ २७॥

पुण्यपापफलं भोक्तुं व्यावहारिककल्पनैः ।
सर्वं तरति वै शोकं शैवो मत्पादसंश्रयः ॥ २८॥

अत्रेतिहासं वक्ष्यामि नागनाथस्य वैभवम् ।
मम लिङ्गात्मनो देवि श्रृणु श्रवणभूषणम् ॥ २९॥

स चक्षुःश्रवसां राजा शेषोऽशेषगुणैर्युतः ।
ब्रह्मणा समनुज्ञातो भूमिसन्धारणाय वै ॥ ३०॥

दृष्ट्वा सपर्वतवनां साब्धिद्वीपोरुपत्तनाम् ।
विषादमगमत् तीव्रं शेषो मां शरणं गतः ॥ ३१॥

आवट्टकमिदं क्षेत्रं प्राप्य कुण्डं तथाऽकरोत् ।
नागकुण्डमिति ख्यातं तत्तीरे तपसि स्थितः ॥ ३२॥

स्वपुच्छवेष्टनैर्भूमिमधिष्ठायोच्छ्यन् फणाः ।
मां विलोक्य महादेवि भस्मरुद्राक्षभूषणः ॥ ३३॥

रुद्रमावर्तयन्तस्थौ शरदां शतमुत्तमम् ।
लिङ्गं सुचक्षुषा पश्यन्चक्षुषां संश्रवन्कथाः ॥ ३४॥

शेषः पवनभुङ्नित्यं तपसाऽशोषयत् तनुम् ।
ग्रीष्मे कुसरितं भानुश्चण्डभानुकरैर्यथा ॥ ३५॥

ब्रह्माद्या देवताः सर्वा द्रष्टुं तं तपसि स्थितम् ।
समागतांस्तदा देवि तान् सर्वान् कुण्डलीश्वरः ॥ ३६॥

अगणय्य तदा तस्थौ माम ध्यायन् लिङ्गरूपिणम् ।
तस्य तद्दार्ढ्यमाज्ञाय ह्यददं दर्शनं शिवे ॥ ३७॥

दृष्ट्वा मां स्वफणाभिश्च ननाम शिरसा शिवम् ।
सहस्रवदनेनापि नाम्नां साहस्रतः शिवे ॥ ३८॥

अपूजयद्बिल्वपत्रैः तुष्टाव जगदीश्वरम् ॥ ३९॥

॥ इति शिवरहस्यान्तर्गते शिवगौरीसंवादे नागेश्वरमहिमवर्णनं सम्पूर्णम् ॥

- ॥ श्रीशिवरहस्यम् । भर्गाख्यः पञ्चमांशः । अध्यायः १७। १-३९॥

- .. shrIshivarahasyam . bhargAkhyaH panchamAMshaH . adhyAyaH 17. 1-39..

Notes:
Shiva describes to Gauri, the glory and merits of worshipping Him as Naganatha at the Nageshwara Jyotirlinga that is located near Nagakunda in Avandha (Avatta) Shiva Kshetra.

The shloka numbers are maintained per the source text.

Proofread by Ruma Dewan

*Nageshvara Mahima Varnanam*
pdf was typeset on February 1, 2024

Please send corrections to *sanskrit@cheerful.com*